RAN-2201131401010001

# RAN-2201131401010001

## M.A. Hindu Studies (Sem. -I) Examination November - 2025

## Sanskrit Parichay ( Paper - MHS - 101)

**Time: 2 Hours ]** **[ Total Marks: 50**

| સૂચના : / Instructions | Seat No.: |
|---|---|
| (1) ઉપરોક્ત દર્શાવેલ વિગતો ઉત્તરવહી પર અવશ્ય લખવી.<br>Fill up strictly the above details on your answer book | Student's Signature |

**પ્ર.1.** **ટૂંકમાં ઉત્તર આપો. (ગમે તે પાંચ)** **(10)**

**प्र.1.** **संक्षिप्त उत्तर दीजिए। ( कोई पांच)**

1. સંસ્કૃત વર્ણમાળાના તાલવ્ય અને દન્ત્ય સ્થાનીય વર્ણો લખો.
1. संस्कृत वर्णमाला के तालव्य और दन्त्य स्थानीय अक्षर लिखें।
2. कर्म कारक સમજાવો.
2. कर्म कारक समझाइये।
3. वृत्रः અને क्षत्रियः શબ્દોનો 'વર્ણવિન્યાસ' કરો
3. वृत्रः और क्षत्रियः शब्दो का वर्णविन्यास कीजिए।
4. પ્રથમા વિભક્તિનું એક ઉદાહરણ આપી સમજાવો.
4. प्रथम विभक्ति को एक उदाहरण सहित समझाइये।
5. માહેશ્વરનો ઉલ્લેખ ક્યા ગ્રંથમાં છે? પ્રથમ બે સૂત્રો લખો.
5. महेश्वर सूत्र किस ग्रंथ में हैं? प्रथम दो सूत्र लिखिए।
6. સંધિ વિચ્છેદ કરો - 1) विवाहमकरोत् 2) भूमिपतिरासीत्
6. संधि विच्छेद करें - 1) विवाहमकरोत् 2) भूमिपतिरासीत्
7. નીચેના વાક્યોનો સંસ્કૃતમાં અનુવાદ કરો.
7. निम्नलिखित वाक्यों का संस्कृत में अनुवाद करें।
   1. મીતા માળા બનાવે છે.
   1. मीता माला बनाती हैं।
   2. શ્રમિક સવારે ખેતરે જાય છે.
   2. श्रमिक सुबह में खेत पर जाता है।

**પ્ર.2.** સંધિ અને તેનાં પ્રકારોની વિસ્તૃત ચર્ચા કરો. **(13)**

**प्र.2.** संधि और उसके प्रकारों पर विस्तार से चर्चा करें।

**અથવા / या**

**પ્ર.2. નીચેના ફકરાનો અનુવાદ કરો.** **(13)**

**प्र.2. निम्नलिखित अनुच्छेद का अनुवाद करें.**

स्वतन्त्रे भारते वयम् अधुना अपि ब्रिटीशादिभिः कथितां न्यायव्यवस्थामेव अनुपालयन्तः स्मः। किन्तु भारतीयग्रन्थेषु न्यायप्रणाली सुदृढा या आसीत् सा न कुत्रापि पाठ्यते। तमेतम् अंशं विषयीकृत्य भारतीयसर्वोच्चन्यायालयस्य न्यायाधीशः न्यायमूर्तिः पङ्कजमित्तलः स्वीयं मानसं प्रकटीकृतवान्। 'भारतीयां न्यायव्यवस्थाम् अवगन्तुं वेदानाम्, उपनिषदां, मनुस्मृतेः, अर्थशास्त्रस्य च अध्ययनम् अपरिहार्यम् अस्ति' इति कथयन् मित्तलवर्यः 'भारतीया न्यायपरम्परा तत्त्वज्ञानपरम्परा च विद्यालयीये शिक्षणे अन्तर्भावनीया' इति सुदृढं प्रतिपादितवान्। ''वेदादिषु, रामायणमहाभारतादिषु, अशोकस्य धम्मेषु च न्यायव्यवस्थायाः, समानतायाः, दण्डनस्य, नैतिककर्तव्यानाम्, अधिकाराणां च गभीराणि प्रतिबिम्बानि दृश्यन्ते। 'धर्मः भारतीयन्यायविचाराः च' 'भारतीयन्यायशास्त्रस्य आधारः' इत्यादयः विषयाः शिक्षणे भवितुम् अर्हन्ति' इत्यपि तेन कथितम्। बहवः संस्कृतज्ञाः आ बहोः कालात् एतद् वदन्तः सन्ति एव। तथापि शङ्खात् आगतं तीर्थम् इति न्यायेन सर्वोच्चन्यायालयस्य न्यायाधीशस्य कथनं निश्चयेन महत्त्वातिशयम् आवहति। न्यायशास्त्रमात्रं न, इतराणि बहूनि शास्त्राणि अस्माकं ग्रन्थगतैः सुक्ष्मचिन्तनैः, भारतीयपरम्परायाः छायाम् आवहद्भिः सिद्धान्तैः च पोष्यन्ते। वैदेशिकचिन्तनपोषिताः विचाराः वैदेशिकचिन्तने एव प्रवर्तयन्ति पठितृन्। किञ्च 'अस्मदीयं किमपि नास्ति' इति हीनभावनां जनयन्ति च। याज्ञावल्क्यकौटिल्यादीनां ग्रन्थेषु प्रणीतं सर्वमपि यथास्थितं स्वीकरणीयं नास्ति। अपि तु तत्रत्यानां विचाराणां तोलनम् अद्यतनपरिस्थित्यनुगुणं विधाय, यथायोग्यं परिवर्तनं कृत्वा, साधकवाधकतां परिशील्य च स्वीकरणं वरं स्यात्। तदर्थं कैश्चित् साकल्येन संशोधनीयाः स्युः एते ग्रन्थाः' इति कथयन् पङ्कजमित्तलवर्यः राजधर्मः न्यायालयीननैतिकता इत्येतादृशानां विषयाणां प्रतिपादनं कालानुगुणं करणीयम् इति प्रत्यपादयत्। 'न्यायनिर्णयाः राजनीतेः आनुकूल्यस्य बलिः मा भवन्तु। न्यायनियमाः कस्याश्चिदपि शक्तेः कारणेन दुर्बलतां न आप्नुयुः' इत्येवं प्राचीनाधुनिकयोः सन्तुलनं साधयन् स्वीयं मतं प्रकटितवान् मित्तलवर्यः अभिनन्दनार्हः। भारतीयग्रन्थानां पठनमपि अनुवादरूपं सर्वथा मास्तु। बहूनां पदानाम् अनुवादः अभिप्रेतम् अर्थ न व्यञ्जयति इत्यतः ग्रन्थसम्पदः मूलस्य अध्ययनम् इष्टसाधकं स्यात्। मित्तलवर्यः इव एवंरीत्या चिन्तयन्तः बहवः सन्ति। सर्वेऽपि योग्यस्थाने प्रतिपादयेयुः चेत् शास्त्राध्ययनदिशि पदानि न्यस्तानि भवेयुः अवश्यमेव।

**પ્ર.3. કોઈપણ એક વિષય પર નિબંધ લખો.** **(13)**

**प्र.3. किसी एक विषय पर निबंध लिखें।**

१. वर्तमानकाले संस्कृतभाषायाः यथार्थता।

२. अस्माकं देशः।

**અથવા**

**પ્ર.3. નીચે આપેલો ફકરો વાંચી, નીચે આપેલા પ્રશ્નોના ઉત્તર આપો.** **(13)**

**प्र.3. नीचे दिए गए गद्यांश को पढ़ें और नीचे दिए गए प्रश्नों के उत्तर दें।**

अस्ति पटनानगरात् किञ्चिद् दूरे विधुपुरं नाम ग्रामः। तत्र वसति स्म भूपसिंहः क्षत्रियः। यथा नाम तथा गुणः। भूपः सत्यमेव महान् विख्यातच भूमिपतिरासीत्। तस्य विशालगृहस्य पुरतः भव्यातिथिशाला निर्मिता। ग्रामीणजनाः, श्रान्ताः क्लान्ताः पथिकाः अपि अत्रागत्य विश्राम्यन्ति। तत्रोपविश्य ग्रामीणजनाः कदाचित् कृषिविषये, केचित् तु राजनीतिविषये, केचन पारिवारिक समस्याम् अधिकृत, कदाचित् सुतानां विवाहादिविषये आलपन्ति विमृश्यन्ति च। भूपसिंहोऽपि वार्तायां सम्मिलित्तो भवति। तस्य मनोरञ्जनस्य साधनं तु केवलं वार्ता एव। अतिथिशालायां पटे जलम्, घटसमीपे पानीयपात्रम्, तत्रैव अन्यस्मिन् पात्रे 'वतासा' इति मिष्टावं रक्षितं भवति। तृषार्ताः मिष्टानं भुक्त्वा शीतलं जलं पिबन्ति। भूपसिंहस्य अधिकः समयः अतिथिशालायामेव व्यतीतो भवति। सः भोजनाय विशेषकार्यवशात् च गृहाभ्यन्तरं गच्छति। गृहं प्रविश्य सः पश्यति यत् कनिष्ठा पत्नी ज्येष्ठायां सेवारता भवति तस्यात्मजायाः वा शुश्रूषां करोती

गृहकार्येषु वा संलग्ना भवति। कनिष्ठा समयानुसारेण आत्मनः सुतस्य ज्येष्ठायाः सुतायाः च सहैव तैलमर्दनं स्नानभोजनादिकं कारयति। तस्याः मनसि सपत्नीभावस्तु अल्पमात्रमपि नास्ति। एतद् दृष्ट्वा भूपसिंहः विस्मितः भवति यत् कथं सा कनिष्ठा लोकपराम्परातः भिन्ना, कियती उदारा, अहङ्कारशुन्या, श्रमशीला वात्सल्यमयी च। सर्वासु स्त्रीषु एतादृशा एवं गुणाः भवेयुः।

भूपसिंहस्य विवाहस्य द्वादशवर्षाणि व्यतीतानि, किन्तु कापि सन्ततिः न जाता। सन्तानहीनतया सः भृशं दुःखी, विषण्णः चिन्ताग्रस्तः च। सः आत्मनः जीवनं निरर्थकं मन्यते। आत्मानं वंशहीनं ज्ञात्वा सः अपरं विवाहमकरोत्। वर्षाभ्यन्तरे एव तस्य मनोवाञ्छितं पूरितम्। कनिष्ठा एकं पुत्रम् अजनयत्। ईश्वरस्य अहैतुक्या कृपया ज्येष्ठायाः अपि एका कन्या जाता। भूपस्य गृहं जीवनञ्च पूर्णम्। पुत्रीं पुत्रं च प्राप्य भूपस्य जीवने नवप्राणस्य सञ्चारः अभवत्।

किन्तु एतत् सुखं दीर्घकालं नातिष्ठत्। कालस्य क्रूरप्रहारेण भूपः दिवं गतः। यदा पुत्रः पञ्चवर्षीयः तदा दैवस्य द्वितीयः प्रहारः अभवत्। ग्रामीणस्त्रियः त्रिवेणीस्नानाय प्रयागरांज गच्छन्ति स्म। कनिष्ठायाः पुत्रोऽपि मातुः अगोचरं ताः अन्वगच्छत्। स्त्रीणां सङ्गं विहाय सः कुत्र गतः इति केनापि न ज्ञातम्। भूपस्य गृहं शून्यं श्रीहीनमभवत्। गृहे द्वे विधवे एका कन्या च अतिष्ठन्। गृहस्य भविष्यं तिरोहितम्।

१. भपूसिंहः कुत्र वसति स्म?
२. भूपसिंहस्य के के सन्ति?
३. ग्रामीणजनाः कुत्र विश्राम्यन्ति?
४. कनिष्ठायाम् कीदृशा गुणाः सन्ति?
५. ग्रामीणस्त्रियः त्रिवेणीस्नानाय कुत्र गच्छन्ति स्म।?
६. भूपस्य गृहं कथम् शून्यं श्रीहीनमभवत्?
७. यथायोग्यं शीर्षकं ददातु।

**प्र.4. ટૂંકનોંધ લખો. (કોઈ પણ બે)** **(14)**

**प्र.4. संक्षिप्त नोट लिखें (कोई दो)**

1. माहेश्वरसूत्राणि
2. 'इश्वर' भारतीय और पाश्चात्य चिन्तन
3. उपपद विभक्ति
4. समासः